दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रशुक्लाष्टमी
चैत्र 12 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-153 | 1 | मार्च 26, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 जीवने करुणायाः, अहिंसायाः च आन्तरिक-शान्तेः महत्त्वं अत्यधिकम् अस्ति- तिब्बती- आध्यात्मिक- गुरुः १४ तमः दलाई लामा

3 अग्निवीरेभ्यः २० प्रतिशतं वृत्ति-आरक्षणस्य अनुशंसा, गृहमन्त्रिणा राज्याणां मुख्यमन्त्रिभ्यः पत्रं लिखितम्

4 देहली-नगरे 'अन्तर्राष्ट्रिय-चलच्चित्र-महोत्सवस्य' भव्यशुभारम्भः

## गुजरातराज्यस्य विधानसभायां समान-नागरिक संहिता (यू. सी. सी.) इति विधेयकं स्वीकृतम्



गुजरातराज्यस्य विधानसभायां समान-नागरिक संहिता (यू. सी. सी.) इति विधेयकं स्वीकृतम् इति गुजरातराज्यस्य मुख्यमन्त्री भूपेन्द्र पटेलः उक्तवान्। सामाजिकान्तर्जालीये पटले श्रीशाहः अवदत् यत् देशे प्रत्येकस्य नागरिकस्य कृते समानं विधिः भवेत् इति भाजपादलस्य आरम्भादेव संकल्पः अस्ति। सः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भाजपादलस्य राज्यसर्वकाराः अस्मिन् विषये निरन्तरं अग्रे गच्छन्ति।

## प्रथमः खेलो-इण्डिया-जनजातीय क्रीडोत्सवस्य रायपुर-नगरे विधिवत् शुभारम्भः अभवत्




छत्तीसगढ़-राज्ये प्रथमा खेलो-इण्डिया-जनजातीय-क्रीडाः आरभ्यन्ते। अप्रैल-मासस्य तृतीय दिनाङ्कपर्यन्तं प्रचलितासु क्रीडासु एथ्लेटिक्स्, हाकी, फुट्बालु, धनुर्विद्या, मल्लयुद्धं, भारोत्तोलनम्, तरणम् इत्यादीसु सप्तसु क्रीडाविभागेषु स्पर्धाः भविष्यन्ति। खेलो-इण्डिया-जनजातीय-क्रीडाः छत्तीसगढ राज्यस्य रायपुरे, जगदलपुरे, अम्बिकापुरे च आयोज्यन्ते। अस्यां स्पर्धायां सम्पूर्ण देशे प्रायः त्रिशत् राज्याणां केन्द्रशासितप्रदेशस्य च त्रिशताधिकाः आदिवासिनः क्रीडकाः अधिकारिणः च भागं ग्रहीष्यन्ति। केन्द्रीय-युवा-प्रकरण-क्रीडामन्त्री डा. मनसुख माण्डवीयः स्पर्धायाः उद्घाटनं कृतवान्।

## 'एल.पी.जी.'-पञ्जीकरण-सीमायां सहैव पेट्रोल-डीजल-मूल्येषु किमपि परिवर्तनं नैव जातम् - पेट्रोलियम-प्राकृतिक-वातेन्धन-मन्त्रालयः



**हिमसंस्कृतवार्ताः** - सर्वकारेण सामाजिक सञ्चालीयमाध्यमेषु प्रसारितानां सूचनानां स्पष्ट-खण्डनं विहितं यत्र प्रधानमन्त्री-उज्ज्वला-योजनायाः अन्तर्गतं एल.पी.जी. रिफिल इति पञ्जीकरणस्य समयसीमायां परिवर्तनमिति पञ्चचत्वारिंशत्-दिनानि यावत् प्रतिपादितम्। पेट्रोलियम-प्राकृतिक-वातेन्धन-मन्त्रालयेन स्पष्टीकृतं यत् एतासु वार्तासु उज्ज्वलेतरायां एकक्रूप्यसंयोजनाय पञ्चविंशति-दिनानि तथा च द्विकूप्यसंयोजनाय पञ्चत्रिंशत्-दिनानि इति यत् तथ्यं प्रसारितं तत् सर्वथा भ्रमात्मकम् अस्ति। मन्त्रालयेन सूचितं यत् ईदृशः कोऽपि परिवर्तननिर्णयः न स्वीकृतः। मन्त्रालयेन प्रतिपादितं यत् रिफिलपञ्जीकरणस्य वर्तमानायां समयसीमायां किमपि परिवर्तनं न जातम्। एषा व्यवस्था पूर्ववत् नगरक्षेत्रेषु पञ्चविंशति-दिनात्मिका तथा च ग्रामीणक्षेत्रेषु पञ्चचत्वारिशत्-दिनात्मिका स्थिरा वर्तते। योजनायाः संयोजनस्य वा स्वरूपं किमपि भवेत् किन्तु पञ्जीकरणनियमः पूर्ववत् अपरिवर्तितः एव स्थास्यति।

## केन्द्रीय-मन्त्रिमण्डलेन क्षेत्रीय-सम्पर्क-योजना 'उड़ान' इत्यस्यै दशवर्षाणां कृते स्वीकृतिः प्रदत्ता




**हिमसंस्कृतवार्ताः** - केन्द्रीय-मन्त्रिमण्डलेन अगामि-दशवर्षाणां कृते चत्वारिंशदधिक-अष्टशतोत्तर अष्टविंशति सहस्र कोटि-रूप्यकाणां व्ययेन 'संशोधित-उड़ान' इति क्षेत्रीय-सम्पर्क-योजनायाः विस्तारः स्वीकृतः। नवदेहल्यां मन्त्रिमण्डलस्य उपवेशनान्तरं सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अवदत् यत् एतस्याः योजनायाः अन्तर्गतं क्षेत्रीय-सम्पर्क वर्धयितुं विद्यमान-अविमानपत्तनेभ्यः एकशतनूलानि विमानपत्तनानि विकसितानि भविष्यन्ति। एतेन दुर्गम क्षेत्रेषु वायु-सम्पर्कः सुदृढो भविष्यति तथा च द्वितीय तृतीय श्रेण्याः नगरेषु आर्थिक-विकासः, व्यापारः, पर्यटनं च वृद्धि प्राप्स्यन्ति। योजनायाः अस्याः मुख्यम् उद्देश्यं सामान्य नागरिकेभ्यः सुलभं स्वल्पव्यययुक्तं च विमानयानस्य सौविध्यप्रदानम् अस्ति।


## लोकसभया ध्वनिमतेन षड्विंशत्यधिक-द्विसहस्रतमस्य वित्त-विधेयकः पारितः

लोकसभया ध्वनिमतेन षड्विंशत्यधिक-द्विसहस्रतमस्य वित्त-विधेयकः पारितः। अस्य विधेयकस्योद्देश्यं द्विसहस्रतमस्य षड्विंशतिः, सप्तविंशतिः इति वित्तीयवर्षाय केन्द्र-सर्वकारस्य वित्तीय-प्रस्तावानां प्रभावीकरणं वर्तते । सदनेन सर्वकार-पक्षतः उपस्थापित-संशोधनानां कृते स्वीकृतिः प्रदत्ता। सदने वित्त-विधेयकस्य चर्चायाः प्रत्युत्तरं प्रयच्छन्ती केन्द्रीय-वित्तमन्त्री निर्मला सीतारमण अवदत् यत् सर्वकारः लघुद्योगानां, कृषकाणां, सहकारी-समितीनाञ्च सशक्तीकरणं कुर्वन्नस्ति यतः एते सर्वे देशस्य वृत्ति-सर्जन, उत्पादने, सर्वाङ्गीण विकासे च केन्द्र-बिन्दवः वर्तन्ते।



## नवरात्रिविशेषः

## अष्टमी महागौरी



**श्वेते वृषे समारूढा श्वेताम्बरधरा शुचिः।**
**महागौरी शुभं दद्यान्महादेवप्रमोददा॥**

महागौरी शिवस्य अर्धाङ्गिनी रूपेण पूजिता। यदा सा कठोरं तपः कृतवती, तदा तस्याः शरीरं कृष्णवर्णं जातम्, परं महादेवेन गङ्गाजलेन क्षालनेन सा पुनः अतीव 'गौरी' अभवत्।

**२. उपासना मंत्र (Upasana Mantra)**


या देवी सर्वभूतेषु
माँ महागौरी रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै
नमस्तस्यै नमो नमः॥

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

# जीवने करुणायाः, अहिंसायाः च आन्तरिक-शान्तेः महत्त्वं अत्यधिकम् अस्ति- तिब्बती- आध्यात्मिक- गुरुः १४ तमः दलाई लामा



**हिमसंस्कृतवार्ताः- धर्मशाला।** तिब्बती-आध्यात्मिक-गुरुः १४तमः दलाई लामा बुधवासरे मैक्लोडगंजस्थिते मुख्य- तिब्बती- मन्दिरे चुगलाखाङ्गमन्दिरे आयोजिते दीर्घायु- प्रार्थना-समारोहे भागं गृहीतवान्। एषा विशेषप्रार्थना उत्सङ्गक्षेत्रेण, दोखाम- जाचुका- संगठनेन, क्यिडोंग-कल्याण-सभया च अर्पिता आसीत्। अस्मिन् अवसरे बहुसंख्यया भिक्षवः भिक्षुण्यः, तिब्बती-समुदायस्य जनाः च उपस्थिताः आसन्। मन्दिर-परिसरे भक्तेः, आस्थायाः, आध्यात्मिक- ऊर्जायाः च अद्भुतः संगमः दृष्टः। सर्वे जनाः स्वप्रिय-गुरोः दीर्घं स्वस्थं शान्तिपूर्णं च जीवनं कामयन्तः दृष्टाः। समारोहस्य कालखण्डे पारम्परिक- तिब्बती- रीत्यानुसारं विशेष- अनुष्ठानानि सम्पन्नानि। बौद्ध-भिक्षूणां मन्त्र- उच्चारणेन सामूहिक-प्रार्थनाभिः च समग्रः वातावरणः भक्तिमयः अभवत्। अस्मिन् अवसरे दलाई लामा श्रद्धालून् सम्बोधयन् करुणायाः, अहिंसायाः, आन्तरिक-शान्तेः च महत्त्वं विशेषतया प्रतिपादितवान्। सः उक्तवान् यत् वास्तविकं सुखं बाह्य-परिस्थितिभ्यः न, अपितु अस्माकं मनसः शान्तेः संतुलनात् च उत्पद्यते। तेन जनाः परस्परं प्रेम, सहिष्णुता, मानवीय-मूल्यानि च अंगीकर्तुं प्रेरिताः। सह एव सः अपि उक्तवान् यत् प्रार्थना तदा एव सार्थका भवति यदा सा दैनन्दिन-जीवने सद्कर्मभिः सकारात्मक-चिन्तनेन च सह संयुज्यते। उपस्थिताः श्रद्धालवः एतत् क्षणं स्वजीवनस्य अत्यन्तं सौभाग्यपूर्णम् अनुभवं इति अवदन्। बौद्ध-अनुयायिनः अपि उक्तवन्तः यत् दीर्घायु-प्रार्थना केवलं धार्मिक-अनुष्ठानं न, अपितु तिब्बती-संस्कृतेः, आस्थायाः, सामुदायिक- एकतायाः च सजीव-प्रतीकं अस्ति, यत् जनान् आध्यात्मिकरूपेण संयोजयति।

# प्रधानमन्त्रिणः हिमाचल-भ्रमणं शीघ्रमेव, सर्वविषयेषु अभवत् विस्तृता चर्चा- जयरामठाकुरः



**हिमसंस्कृतवार्ताः- शिमला।** दिल्ली-भ्रमणतः प्रत्यागत्य पूर्वमुख्यमन्त्री तथा प्रतिपक्षनेता जयरामठाकुरः प्रदेशस्य वर्तमान- राजनैतिक-आर्थिक- परिस्थितीन् लक्षीकृत्य काङ्ग्रेस-सर्वकारस्य उपरि तीक्ष्णं प्रहारं अकरोत्। प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मेलनानन्तरं माध्यमैः (Media) सह वार्तालापे सः अवदत् यत् प्रधानमन्त्रिणः पुरतः प्रदेशस्य गम्भीर- आर्थिक- सङ्कटस्य विस्तृतं विवरणं प्रस्तुतं, केन्द्रात् च आवश्यक-सहयोगस्य आग्रहः कृतः। प्रधानमन्त्रिणः नरेन्द्रमोदिनः शीघ्रमेव हिमाचलभ्रमणं प्रस्तावितं वर्तते, यत् प्रदेशस्य कृते महत्त्वपूर्णं भविष्यति। प्रधानमन्त्रिणा सह प्रत्येकं विषये सुदीर्घा विस्तृता च चर्चा अभवत्, यस्याः परिणामान् भवन्तः शीघ्रमेव द्रक्ष्यन्ति। विधानसभा-परिसरे जयरामठाकुरः मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य नेतृत्वे प्रचलन्तं सर्वकारम् आक्षिपन् स्पष्टं कृतवान् यत् प्रदेशस्य बिभ्यत्-वित्तीय-स्थितये सुक्खू-सर्वकारस्य नीतयः एव पूर्णतया उत्तरदायिनः सन्ति, येन राज्यस्य अर्थव्यवस्था निरन्तरं रसातलं गच्छति। केन्द्रसर्वकारेण धनम् अवरुद्धम् इति आरोपान् निराकुर्वन् सः व्यङ्ग्यं अकरोत् यत्- "प्रधानमन्त्रिणा सह मेलनं सौभाग्यस्य विषयः, यदि मुख्यमन्त्री अपि उचितरीत्या समयं प्रार्थयेत्, तर्हि सः अपि केन्द्रेण सह संवादस्य अवसरं प्राप्तुं शक्नोति।"

सः काङ्ग्रेस-नेतृभ्यः उपदेशं यच्छन् अवदत्- "अस्माकं नेतृभिः सह मेलनाय काङ्ग्रेस-जनानां अनुमतिः आवश्यकी नास्ति। हिमाचले राहुलगान्धी अपि आगतवान्, प्रियंका-गान्धी अपि सद्यः आगता। तौ तु कस्मैचित् मेलनस्य अनुमतिम् अपि न दत्तवन्तौ। एतौ तु केवलं 'पर्यटकौ' इव आगच्छतः, परन्तु स्वकीय-पक्षस्य नेतृभिः सह मेलनाय समयं न दत्तः।" सः अधिकं अवदत् यत् राहुलगान्धी-महोदयस्य विकृत-चिन्तनस्य प्रभावः हिमाचल-काङ्ग्रेस-नेतृषु अपि जातः अस्ति।

प्रदेशे 'परिधान-संहिता' (ड्रेस कोड) नियमान् अधिकृत्य जयरामठाकुरः कठोरशब्देषु अवदत् यत् सर्वकारेण प्रथमं स्वकीय-नेतृणां आचरणे परिधाने च उचितं बोधं विकसितुं प्रयासः करणीयः। सः अतर्कयत्- "तेषां नेता राहुल-गान्धी कीदृशानि वस्त्राणि धृत्वा लोकसभां गच्छति इति सर्वे पश्यन्ति। तस्य टी-शर्ट (T-shirt) परिधानस्य विषये तं बोधयितुं शक्यते। देशस्य गौरवं वर्धयति 'एआई-सम्मेलने' (AI Summit) अशिष्टं व्यवहारं कुर्वन्तः वरिष्ठाधिकारिणः परिधानकला शिक्षणीयाः।" सः आरोपं अकरोत् यत् मुख्यमन्त्री कथयति यत् जनतायै कोषः रिक्तः अस्ति, परन्तु देशस्य विभिन्नभागेभ्यः आगतानां काङ्ग्रेस-नेतृणां 'राजकीय-अतिथि' (State Guest) रूपेण सत्कारं कृत्वा कोटिशः रुप्यकाणि लुण्ठयति।

जयरामठाकुरः विशेषतः हरियाणा-राज्यस्य विधायकानां सत्कारे द्वयोः दिनयोः त्रिंशत्-लक्ष (३०,००,०००) रुप्यकाणां व्ययस्य विषयं उत्थापितवान्। सः अवदत् यत् एकतः सर्वकारः मितव्ययितायाः डिण्डिमं वादयति, अन्यतः च राजकीय-कोषस्य दुरुपयोगं कृत्वा अतिथीनां सत्कारं करोति, यदा तु सामान्या जनता आधारभूत-सुविधाभ्यः अपि त्रस्ता वर्तते।

# राज्यसभया षड्विंशत्यधिक-द्विसहस्रतमस्य उभयलिङ्गि-व्यक्ति-संशोधन-विधेयकम् विचारार्थं अनुमोदनार्थञ्च स्वीकृतम्



राज्यसभया षड्विंशत्यधिक-द्विसहस्रतमस्य उभयलिङ्गि व्यक्ति- संशोधन विधेयकम् विचारार्थं अनुमोदनार्थञ्च स्वीकृतम्। अयं विधेयकः लोकसभया विपक्षीदलानां बहिर्गमनस्य मध्ये ध्वनिमतेन पारितम्। अयं विधेयकः उभयलिङ्गि-वर्गं पुनः परिभाषितुं प्रयतते, यस्मिन् स्व-प्रत्यक्षीकृत-लिङ्ग-परिचयस्य प्रावधानं निष्कासितं तथा च केचन सामाजिक-सांस्कृतिक-परिचयाः ट्रांस-मैस्कुलिन इति वर्गाः च अस्य परिधेः बहिः कृताः सन्ति। उच्चसदने चर्चां प्रारम्भमाणा कांग्रेस-सांसदः रेणुका-चौधरी अवदत् यत् अयं विधेयकः संविधाने प्रदत्तस्य वैयक्तिक-गोपनीयतायाः अधिकारं दुर्बलीकरोति। डी.एम. के. सांसदः तिरुचि-शिवा अपि विधेयकस्य विरोधं कुर्वन् अवदत् यत् यदि एतत् संसदि बहुमतेन पारितं भवति, तदापि सर्वोच्चन्यायालयः एतं निरस्तीकरिष्यति। अपरत्र, विधेयकस्य समर्थनं कुर्वन्ती भाजपा-सांसदः मेधा-विश्राम-कुलकर्णी अवदत् यत् उभयलिङ्गि व्यक्तीनां कृते न्यायस्य, गरिम्णः, अपराधिक प्रक्रियाणां संरक्षणाय तथा च विधिक सुरक्षा-निश्चयनाय एतत् विधेयकं महदुपयोगि वर्तते। सा प्रधानमन्त्रिणे नरेन्द्रमोदिने अपि धन्यवादं ज्ञापितवती यत् अनेन संशोधनेन सह वास्तविकाः लाभार्थिनः उचितरीत्या लाभं प्राप्तुं शक्ष्यन्ति।

# छत्तीसगढ़-राज्ये अष्टादश माओवादिनः आत्मसमर्पणं कृतवन्तः यस्मिन् सप्त महिलाः सन्ति



छत्तीसगढ़-राज्ये, माओवादी-सङ्घटनस्य शीर्षनेत्रा पापाराव् इत्यनेन सह आहत्य अष्टादश माओवादिनः आत्मसमर्पणं कृतवन्तः यस्मिन् सप्त महिलाः सन्ति। पापारावः माओवादी-सङ्घटनस्य राज्यक्षेत्र-समितेः सदस्यः आसीत्, तस्य उपरि पञ्चविंशति लक्षरूप्यकाणां पुरस्कारोपि आसीत्। आत्मसमर्पणावधौ ते अनेकानि शस्त्राणि अपि समर्पितवन्तः।

# भारत-ऋतु-विभागः

भारत-ऋतु-विभागेन आई. एम्. डी. इत्यनेन आन्ध्रप्रदेशे, मध्यप्रदेशे, महाराष्ट्रे, तेलङ्गाना-प्रदेशे च वृष्ट्या सह तीव्रवायोः पूर्वानुमानं प्रकटितम्। आगामि दिनद्वयोः कर्णाटकराज्ये, उपहिमालयीये पश्चिमवङ्गप्रदेशे, विदर्भे, सिक्किम्-प्रदेशे च एतादृशेः स्थितेः अपेक्षा अस्ति। केरल-माहे-प्रदेशयोः श्वः यावत् उष्ण-आर्द्र-ऋतोः पूर्वानुमानम् अपि विभागेन प्रकटितम् अस्ति।

# HP Satellite Cities- हिमाचलप्रदेशे त्रयाणां नूतन-सेटेलाइट-नगराणां विकासाय साहाय्यं करिष्यति 'हुडको' इति, सामञ्जस्य-पत्रं हस्ताक्षरितम्




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे त्रयाणां नूतनानां 'अनुषङ्गी' (सेटेलाइट) नगराणां विकासाय 'हिमाचलप्रदेश-आवास-एवं-शहरी-विकास-प्राधिकरणम्' (हिमुडा - HIMUDA) तथा 'हाउसिंग एण्ड अर्बन डिवेल्पमेन्ट कॉर्पोरेशन लिमिटेड' (हुडको- HUDCO) इत्यनयोः मध्ये बुधवासरे शिमलायां नगर-ग्राम-नियोजन-मन्त्रिणः राजेश-धर्माणी- महोदयस्य उपस्थितौ एकं सामञ्जस्य-पत्रं (MoU) हस्ताक्षरितम्। अस्य अनुबन्धस्य अन्तर्गतं 'हिम चण्डीगढ़म्, 'हिम पञ्चकूला' तथा 'काङ्गड़ा वैली एयरोसिटी' इत्येतेषां निर्माणं करिष्यते। हिमुडा-पक्षतः मुख्य-कार्यकारी-अधिकारी तथा सचिवः डॉ. सुरेन्द्रकुमारवशिष्ठः एवं च हुडको- पक्षतः क्षेत्रीय-प्रमुखः नीरजसेठी महोदयः सामञ्जस्यपत्रे हस्ताक्षरं कृतवन्तौ।

राजेशधर्माणी-महोदयः अवदत् यत् पर्यावरण-संरक्षणाय सर्वोच्च-प्राथमिकतां दत्त्वा सुनियोजित-नगरीकरणस्य प्रवर्धने एताः परियोजनाः 'आधारशिलाः' भविष्यन्ति। आगामि-आवश्यकताः संलक्ष्य एतासां निर्माणं भविष्यति। राज्ये वर्धमानस्य नगरीकरणस्य प्रभावं न्यूनीकर्तुं तथा सन्तुलित-क्षेत्रीय-विकासाय एताः परियोजनाः भविष्योन्मुख-शहरी- केन्द्ररूपेण विकसिताः भविष्यन्ति। मन्त्रिणा उक्तं यत् मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खु-महोदयस्य सुनियोजित- नगरीकरणस्य परिकल्पनां साकारं कर्तुम् एताः परियोजनाः सहायिकाः सिद्धाः भविष्यन्ति। एषः प्रयासः नूतन-आर्थिक-अवसराणां सृजने अपि सहायकः भविष्यति। एतासां परियोजनानां साकारेण प्रदेशाय नूतना अभिज्ञानं (परिचयं) प्राप्स्यति, जनेभ्यः साक्षात् परोक्षं च जीविकायाः अवसराः सुलभाः भविष्यन्ति। अस्मिन् अवसरे हिमुडा-उपाध्यक्षः यशवन्तछाजटा तथा अन्याः वरिष्ठाधिकारिणः उपस्थिताः आसन्

# अग्निवीरेभ्यः २० प्रतिशतं वृत्ति-आरक्षणस्य अनुशंसा, गृहमन्त्रिणा राज्याणां मुख्यमन्त्रिभ्यः पत्रं लिखितम्



**हिमसंस्कृतवार्ताः- नवदेहली।**

केन्द्रसर्वकारेण अग्निवीराणां कृते वृत्ति-अवसरान् सुनिश्चितं कर्तुं महत्त्वपूर्णं पदं वर्धयता सर्वेभ्यः राज्येभ्यः सर्वकारीय-सेवासु २० प्रतिशतं (२०%) आरक्षणं प्रदातुम् अनुशंसा कृता। अस्मिन् विषये केन्द्रीय-गृहमन्त्रिणा अमितशाह-महोदयेन सर्वेषां राज्याणां मुख्यमन्त्रिभ्यः पत्रं लिखितम्। इयं पदं तस्मिन् समये कृतं यदा अग्निवीराणां प्रथमः गणः (Batch) वर्षे २०२७ मध्ये स्वकीयां चतुर्वर्षीयां सेवां पूर्णां करिष्यति। केन्द्रसर्वकारस्य इच्छा अस्ति यत् सेवा-समाप्तेः अनन्तरं एतेभ्यः युवकेभ्यः पर्याप्त-जीविका-अवसराः सुलभाः भवेयुः। गृह-मन्त्रालयेन प्रेषिते पत्रे उक्तं यत् पूर्वसैनिकानां पंक्तौ अग्निवीरेभ्यः अपि राज्यसर्वकारस्य विविध- विभागेषु अवसराः प्रदातव्याः।

## केषु पदेषु भविष्यति आरक्षणम्?

पत्रे विशेषरूपेण वनरक्षक (Forest Guard), खननरक्षकः (Mining Guard), आरक्षकः (Police Constable), अग्निशामक (Fireman), अश्वारोहीदलं (Mounted Police), कारागार- रक्षकः (Jail Warden), विशेष- आरक्षकः (SPO), राज्य- आपदा-प्रतिक्रिया- बलम् (SDRF) इत्यादिषु पदेषु २० प्रतिशतम् आरक्षणं प्रदातुम् अनुशंसा कृता अस्ति। अस्य लक्ष्यम् अनुशासितानां प्रशिक्षितानां च अग्निवीराणां सेवानाम् उपयोगं राज्येषु विधिव्यवस्थाम् आपदा-प्रबन्धनं च सुदृढं कर्तुं वर्तते।

## राज्याणां स्थितिः हिमाचलप्रदेशस्य च सन्दर्भः

देशस्य अनेकेषु राज्येषु अयं निर्णयः आरब्धः। हरियाणा-राज्यं ईदृशम् आरक्षणं प्रदातुं प्रथमं राज्यं जातं, यत्र आरक्षक- खननरक्षक- कारागाररक्षक-पदेषु अग्निवीराणां कृते प्रावधानं कृतम्। उत्तराखण्ड-राज्येनापि आरक्षक-सेवासु आरक्षणस्य घोषणा कृता।

हिमाचलप्रदेशः, यः 'वीरभूमिः' इति प्रसिद्धः, तत्र महत्यां संख्यायां युनः त्रिषु सेनासु अग्निवीररूपेण सेवां कुर्वन्तः सन्ति। अतः २०२७ वर्षे प्रथमगणस्य प्रत्यागमनानन्तरं तेषां वृत्ति-अवसराः राज्यसर्वकारस्य निर्णये आधाि‍रताः भविष्यन्ति। अस्मिन् विषये हिमाचलप्रदेशस्य सैनिक-कल्याण- विभागेन अपि राज्यसर्वकाराय विस्तृतं विवरणं प्रेषितम्। विभागस्य निदेशकः ब्रिगेडियर- मदनशीलशर्मा (सेवानिवृत्तः) अवदत् यत् गृह- मन्त्रालयात् पत्रं प्राप्तं, यस्मिन् अग्निवीरेभ्यः राज्यविभागेषु २० प्रतिशतम् आरक्षणं प्रदातुम् अनुशंसा अस्ति। केन्द्रसर्वकारः पूर्वमेव अर्धसैनिकबलेषु (Paramilitary Forces) अग्निवीरेभ्यः अवसरान् दत्तवान् अस्ति, राज्यसेवासु आरक्षणं प्राप्य यूनां कृते वृत्ति-विकल्पाः भविष्यन्ति।

# संशोधित-टोल-नीत्या २२८ कोटि-राजस्वस्य अनुमानम्, सीमावर्ति-निवासिभ्यः संबलं सम्भवम्, निजी-वाहनानि मुक्तानि




**हिमसंस्कृतवार्ताः- शिमला।**

हिमाचलप्रदेशसर्वकारेण संशोधित- टोल- नीति-अन्तर्गतं प्रवेशकरात् (टोल) २२८ कोटिरुप्यकाणां राजस्वस्य अनुमानं कृतम्, यत् गतवर्षस्य तुलनायां ५४ कोटिरुप्यकाणि अधिकं वर्तते। विधानसभायां प्रचलन्त्यां चर्चायां विधायकैः राकेशजम्वाल-राकेशकालिया- सुखरामचौधरी-महोदयैः सीमावर्तिक्षेत्राणां निवासिनां दैनिक-यात्रिणां च उपरि प्रवेशकरस्य प्रभावं प्रति चिन्ता प्रकटीकृता। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः स्पष्टं कृतवान् यत् हिमाचलप्रदेशे पञ्जीकृतानि निजी-वाहनानि (Private Vehicles) प्रवेश-करात् मुक्तानि सन्ति। सः अवदत् यत् अयं करः मुख्यरूपेण वाणिज्यिक-परिवहन-वाहनेषु (यथा ट्रक, बस, भारवाहकानि) एव प्रयुक्तः भविष्यति। राज्यसर्वकारः 'एनएचएआई' (NHAI) इत्यनेन सह अपि सम्पर्कं कुर्वन् अस्ति, येन सीमासु यान-सम्मर्दः (Traffic jam) न्यूनः भवेत्।

## प्रस्तावित-कराणां विवरणम्

वर्षे २०२५-२६ तः २०२६-२७ पर्यन्तं प्रस्तावित-नीत्यनुसारं भार-क्षमतायाः आधारेण कराणां दरं निर्धारितम् अस्ति-

- •लघु-मोटर-वाहनानि ७० रुप्यकाणि।
- •लघु-भारवाहक-वाहनानि (Small Goods Vehicles) १३० तः १७० रुप्यकाणि।
- •बृहत्-भारवाहक-वाहनानि (Truck/ Bus) ५७० तः ९०० रुप्यकाणि (एतेषां भारानुसारम्)।

## स्थानीय-निवासिभ्यः संबलम्

सर्वकारेण स्पष्टं कृतं यत् टोल-सीमातः पञ्च-किलोमीटर परिधौ निवसन्तः स्थानीयाः निवासिनः 'अपहारपत्रं' (Discounted Pass) प्राप्तुं शक्ष्यन्ति, यदि स्थानीय-प्रशासनेन ते प्रमाणिताः स्युः। परन्तु हिमाचलप्रदेशात् बहिः पञ्जीकृतेभ्यः वाहनेभ्यः ईदृशी कापि शिथिलता न भविष्यति।

### विधायकानाम् अभ्यर्थना मुख्यमंत्रिणः आश्वासनं च

विधायकः राकेशकालिया अवदत् यत् हिमाचलस्य पञ्जाब-हरियाणा-राज्यैः सह घनिष्ठं सामाजिक-आर्थिकं च सम्बन्धं वर्तते, अतः दैनन्दिन-कार्यार्थं गमनं न प्रभावितं भवेत्। सुखरामचौधरी महोदयः काला-अम्ब, पांवटा-साहिब तथा यमुनानगर- क्षेत्रेषु कार्यरतानां कर्मचारिणां समस्याः उत्थापितवान्। विपक्षीयानां आरोपाणां खण्डनं कुर्वन् मुख्यमन्त्री अवदत् यत्- "विपक्षः भ्रामक- सूचना प्रसारयति।" सः आश्वासनं दत्तवान् यत् सीमावर्ति-निवासिनां औद्योगिक-कर्मचारिणां च विषये विस्तरेण विचारः करिष्यते, अन्तिम- निर्णयार्थं च मन्त्रिमण्डलस्य (Cabinet) पुरतः प्रस्तावः प्रस्थास्यते।

# नवदेहल्याम् अन्ताराष्ट्रिय-चलच्चित्र-महोत्सवस्य शुभारम्भः

नवदेहल्यां षड्विंशत्यधिक द्विसहस्रतम वर्षस्य अन्ताराष्ट्रिय चलच्चित्र महोत्सवः, आई. एफ़. एफ़. डि., राष्ट्रिय-राजधान्यां भारतमण्डपे आरभ्यते। अद्यारभ्य अस्य मासस्य एकत्रिंशत्-दिनाङ्कपर्यन्तम् अयं महोत्सवः प्रचलिष्यति, देहल्याम् आयोजिते अन्ताराष्ट्रिय चलच्चित्रमहोत्सवे सप्तचत्वारिंशत् देशानाम् त्रिंशोत्तरैकशताधिकानि प्रदर्शनानि प्रदर्श्यन्ते। अस्मिन् कार्यक्रमे विक्की कौशल, हेमा मालिनी, भूमि पेडनेकर, राणा दग्गुबाती, मधुर भण्डारकर, सुभाष घई इत्यादयः भारतीय-अन्ताराष्ट्रिय-चलच्चित्रक्षेत्रस्य च प्रसिद्धाः सदस्याः अपि उपस्थिताः भविष्यन्ति।





हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा -१६

सम्प्रति अस्मद्धिन्दुसमाजे वर्णम् अधिकृत्य नानातर्कवितर्कादिकं समुद्भूतमस्तीति परिलक्ष्यते । संवेदनशीलविषयः सञ्जातोऽस्त्ययम् । अद्यतनाः जनाः भौतिकशिक्षया परिपुष्टाः, प्राचीननियमान् स्वीकर्तुं नेच्छेयुः प्रायः । पुरातनाः महर्षयः ज्ञानविज्ञानादिभिः सम्पृक्ताः, महान्तः दूरदर्शिनः आसन् । मानवजगतः हिताय हि तैः शास्त्रेषु समुचितं मार्गदर्शनं कृतं प्राप्यते । तद् वर्णविषयकं किञ्चिद् विवरणं यथाज्ञानमत्र प्रस्तोतुं प्रयत्यते ।

'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ।।' (४/१३, गीता)

'ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः चेति वर्णचतुष्टयं गुणकर्मणोः विभागानुसारं मद्वारा हि रचितमस्ति । एवं प्रकारेण अस्य सृष्टिरचनादिकार्यस्य कर्ताहमेवास्मि चेदपि अविनाशिनं परमेश्वरं मां त्वं वस्तुतः अकर्ता इत्येव जानीहि, अर्जुन ! ' इत्यर्थः ।

अनादिकालतः जीवानां यत् जन्मजन्मान्तरेषु कृतः कर्मराशिः वर्तते, यस्य फलम् इतोऽपि अवशिष्टम् अभुक्तं वा, तदनुसारं हि तत्र यथायोग्यं सत्व-रजस्तमगुणानां न्यूनाधिकता भवति । भगवान् यदा सृष्टिरचनासमये मनुष्यं निर्माति, तदा तत्तद्गुणकर्मानुसारं ब्राह्मणादिवर्णानाम् उत्पन्नं व्यवस्थां वा करोति । अर्थात् यस्य सत्त्वगुणः अधिकः, तं ब्राह्मणं करोति ; एवमेव सत्त्वमिश्रितस्य रजोगुणस्य अधिकतायां क्षत्रियः, तमोमिश्रितस्य रजोगुणस्य अधिकतायां वैश्यः, तथा यः रजोमिश्रित-तमःप्रधानः भवति सः शूद्रः, इत्येवं प्रकारेण स्वयं भगवान् मनुष्यस्य जातिनिर्माणव्यवस्थां करोति । इत्थं प्रकारेण विरचितानां वर्णानाङ्कते तेषां स्वभावानुगुणं पृथक्पृथक् कर्मविधानमपि भगवान् स्वयं करोति । ब्राह्मणः शमदमादिकर्मणि रतः भवेत्, क्षत्रिये तेजः शौर्यादिकं स्यात्, वैश्यः कृषिगोरक्षादिकार्ये संलग्नः भवेत्, शुद्रश्च सेवापरायणः स्यात् इति ।

मनुष्येण आदौ कर्ममहत्त्वं सम्यक् ज्ञातव्यम्, कर्म च अवश्यं कर्तव्यम् । सनातनधर्मस्य सिद्धान्तः यत् जन्मतस्तु सर्वे सम-आकारप्रकारेण भवन्ति, पुनः वर्णानुसारं यदा बालकाय संस्कारः प्रदीयते, तदा सः स्वधर्मपालने उद्युक्तः भवति, एवमेव तस्मिन् वर्णगतोत्कर्षः जाग्रति । एतस्य तात्पर्यं यत् सर्वे वर्णाः स्वस्वसंस्कारं न त्यजेयुः कदापीति । 'संस्काराद् द्विज उच्यते ।' इत्यर्थात् संस्कारात् हि द्विजत्वं जागर्ति । अतः प्रत्येकं मनुष्यः स्ववर्णाश्रमानुसारं विहितकर्मणः पालनं कुर्यादिति गीतायाः स्वधर्मः ।

परन्तु अद्यत्वे वर्णविषयकं शैथिल्यम् अधिकमात्रायां जायमानमस्ति जनसमाजे, तत् पाश्चात्यप्रभावकारणतः सम्भवतः । तद्विषयकं मतानैक्यमपि वर्धमानं हि ।वस्तुतः अत्र शास्त्रं हि आधारभूतम् सर्वेषामिति ।

'सिद्धिं गच्छेद्यथा कार्यं दैवकार्यसमुच्चयात् ।
एवं संसिद्धिमायाति पुरुषो जातिकर्मणोः ।। इति, शुभम् ।

# "लौकिकन्यायकोशः"
# "स्वभावसिद्धन्यायः"

कियदपि घर्षणं कृतं छेदितं चेदपि चन्दनं स्वसुगन्धं न त्यजति कियदपि तप्तं चेदपि सुवर्णं स्वप्रकाशं न त्यजति तथैव कियदपि कष्टं प्राप्तं चेदपि सज्जनः स्वगुणं न परित्यजति इति भावः। यथा-

**"घृष्टं-घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं,**
**छिन्नं-छिन्नं पुररुपि पुनः स्वादु चैवेक्षुकाण्डम्।**
**दग्धं-दग्धं पुनरपि पुनः काञ्चनं वान्तवर्णं,**
**न प्राणान्ते प्रकृतिर्विकृतिः जायते ह्युत्तमानाम्।।**
[पाणिनिमहाभाष्ये १-२-५]

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य बहु-विचित्राः वार्ताः श्रुताः मया। बेङ्गलूरु-नगरे एकया नवयुवत्या स्वस्य मासिक-व्ययः अन्तर्जाले प्रकाशितः। तस्याः व्ययः लक्ष-रूप्यकाणि अस्ति! तया मानसिक-चिकित्सायै शरीर-मर्दनाय च बहु-धनं व्ययितम्। एतत् दृष्ट्वा जनैः महान् विवादः आरब्धः।

**नन्दिनी-** आम्, तत् सत्यम्। अद्यतने काले नूतन-प्रसूत्याः व्यय-क्रमः अतीव भिन्नः दृश्यते। किन्तु अन्या वार्ता अपि आश्चर्यकरी अस्ति। चीनदेशे एकेन वृद्धेन स्वस्य शुनकः द्विचक्रिकां कर्षितुं प्रयुक्तः। तेन वृद्धेन यन्त्र-रहिता द्विचक्रिका चालिता, सा च शुनकेन कर्षिता। अन्तर्जाले एतत् दृश्यं दृष्ट्वा पशु-रक्षकैः क्रोधः प्रकटितः अस्ति।

**काव्या-** अहो कष्टम्! पशूनां विषये जनाः अतीव निर्दयाः भवन्ति। तथापि धन-विषये मया अन्या वार्ता पठिता। एकेन पुरुषेण अन्तर्जाले स्वस्य दुःखं प्रकाशितम्। तस्य मासिकम् आयम् अशीति-सहस्र-रूप्यकाणि अस्ति, किन्तु तेन किमपि न संरक्षितम्। तेन सर्वं धनं व्ययितम्। "किं मया धनं सम्यक् न रक्षितम्?" इति तेन पृष्टम्।

**नन्दिनी-** सत्यम्, वर्तमानकाले जीवन-मूल्यं महद् वर्धितम् अस्ति, अतः संरक्षणं कठिनं जातम्। किन्तु उद्योग-विषये एका अतीव हास्यकरी वार्ता अपि प्राप्ता। एकया वध्वा स्वस्य विवाह-दिने एव उद्योग-पत्रं प्रेषितम्। तया सङ्गणक-यन्त्रेण कार्यं कृतम्। अन्तर्जाल-जनाः एतत् दृष्ट्वा आश्चर्यं प्राप्तवन्तः सन्ति।

**काव्या-** अहो! तस्याः प्राथमिकता स्पष्टा अस्ति। अद्यतनी वार्ता-प्रस्तुतिः अतीव रोचका आसीत्।



# जनजातीय-योगदानं युगान्तरेषु महत्त्वपूर्णम्-: राज्यमन्त्री दुर्गादास उइके

नवदेहली-:केन्द्रीय-जनजातीय-कार्य-राज्यमन्त्री दुर्गादास उइके महोदयः अद्य अवदत् यत् प्रत्येकस्मिन् युगे जनजातीय-समुदायानां योगदानं महत्त्वपूर्णं वर्तते, अतः अस्य संरक्षणं प्रोत्साहनं च अनिवार्यम् अस्ति।नवदेहली-नगरे आयोजितस्य 'दशम-राष्ट्रिय-जनजातीय-तथा-लोकसंस्कृति-साहित्य-महोत्सवस्य' उद्घाटन-सत्रे सम्बोधनकाले श्री उइके महोदयः जनजातीय-साहित्यं संस्कृतिं च भारतस्य सभ्यतायाः चेतनायाः अभिन्नम् अङ्गं इति वर्णितवान्। अस्य द्विदिवसीय-महोत्सवस्य आयोजनं इन्दिरा गान्धी राष्ट्रिय-कला-केन्द्रेण (IGNCA), इन्दिरा गान्धी राष्ट्रिय-मानव-सङ्ग्रहालयस्य (IGRMS) सहयोगेन कृतम् अस्ति।

# देहली-नगरे 'अन्तर्राष्ट्रिय-चलच्चित्र-महोत्सवस्य' भव्यशुभारम्भः

राष्ट्रियराजधान्याः 'भारत-मण्डपम्' इति स्थाने 'अन्तर्राष्ट्रिय-चलच्चित्र-महोत्सवः' (International Film Festival) आरब्धः। देहल्याः मुख्यमन्त्री रेखा गुप्ता महोदया अस्य महोत्सवस्य विधिवत् उद्घाटनं कृतवती। सप्ताहपर्यन्तं चलिते अस्मिन् उत्सवे विश्वस्य विविधेभ्यः देशेभ्यः १३० तः अधिकानि चलच्चित्राणि प्रदर्श्यन्ते, यत् भारतस्य वैश्विक-सिनेमा-क्षेत्रे एकं महत्त्वपूर्णं सोपानं मन्यते। अस्मिन् महोत्सवे निःशुल्कं सार्वजनिक-प्रदर्शनानि, विचार-गोष्ठ्यः, कार्यशालाः तथा विविधाः सांस्कृतिक-कार्यक्रमाः अपि आयोजयिष्यन्ते। अस्मिन् अवसरे देहल्याः मन्त्रिणः आशीष सूदः, मन्जिन्दर सिंह सिरसा, कपिल मिश्रा च उपस्थिताः आसन्।

**वैश्विक-स्तरे प्रभावः-**-अयं महोत्सवः अस्मिन् मासे ३१ दिनाङ्कपर्यन्तं भविष्यति, यत्र ४७ देशानां चलच्चित्राणि दर्शयिष्यन्ते। उल्लेखनीयं वर्तते यत् १०१ देशेभ्यः आगतासु द्वि-सहस्राधिक (२०००+) प्रविष्टिषु एतानि चलच्चित्राणि चयितानि सन्ति। महोत्सवस्य आरम्भः प्रसिद्ध-चलच्चित्रकारस्य ओलिवर लैक्स महोदयस्य ऑस्कर-नामाङ्कित-चलच्चित्रेण 'सीरत' इति नाम्ना अभवत्। अस्य समापनं च सिङ्गापुरस्य निर्देशकस्य तान सियू इत्यस्य 'अमीबा' इति चलच्चित्रेण भविष्यति।कलाकाराणां उत्साहः-सम्भाषणकाले चलच्चित्रनिर्माता भार्गव सैकिया महोदयः देहली-प्रशासनाय कृतज्ञतां ज्ञापितवान्। तस्य चलच्चित्रं 'बौक्शी' अपि अस्मिन् महोत्सवे प्रदर्श्यते। तेन उक्तं यत् स्वतन्त्र-सिनेमा (Independent Cinema) प्रवर्धनार्थं एषः मञ्चः अतीव आवश्यकः अस्ति।अस्मिन् महोत्सवे भारतीय-सिनेमा-जगतः प्रसिद्धाः कलाकाराः विकी कौशलः, हेमा मालिनी, भूमि पेडनेकर इत्यादयः अपि भागं वहिष्यन्ति। आगामि-वर्षेषु एषः महोत्सवः रचनात्मकतायाः सहयोगस्य च एकं प्रमुखं केन्द्रं भविष्यति।